Shri Raghunath Temple MSS. Library,
JAMMU

No. १३२०

Title अवच्छेदकानुमिति विचारः

Author ×

Extent १८ Age ×

Subject न्याय वैशेषिकं

सवह्नोदकानुमितिविचारः

१३२०

१०. १८

१९०

अ॰
१

श्रीः॥ अनुमितिर्द्विविधा॥ पक्षतावच्छेदके साध्यसामानाधिकरण्यमात्रावगाहिनी। पक्षतावच्छेदके साध्यावच्छेदक
त्वावगाहिनी च। तत्रैकधर्मिणि साध्यपक्षतावच्छेदकयोः संबन्धावगाहनमेव तदुभयसामानाधिकरण्यविगाहनं॥
न तु पक्षतावच्छेदके साध्याधिकरणवृत्तित्वावगाहनं साध्ये पक्षतावच्छेदकाधिकरणवृत्तित्वावगाहनं वा। पर्वतो वह्निमा
नित्याद्यनुमितौ तद्विषयताया अननुभवात्। तदभ्युपगमे प्रयोजनविरहाच्च। सामानाधिकरण्यमात्रावगाहित्वं च। अ
वच्छेदकत्वानवगाहित्वे सति सामानाधिकरण्यावगाहित्वं। तच्च न कस्यचिदपि पक्षतावच्छेदकं। अवच्छेदकत्वभासक
सामग्र्या असत्त्वात्। अनुमितिसामग्रीसत्त्वेऽर्थवशादेव तद्विच्छित्त्युत्पत्तेः। अवच्छेदकभासकसामग्री चाग्रे वक्ष्यते। यत्तु सा
मानाधिकरण्येन सिद्धिसत्त्वेऽवच्छेदकावच्छेदेनानुमित्युदयात्तत्र व्यभिचारवारणाय तादृशसिध्यभावत्वस्य पक्षतावच्छेदक राम॰
मेव तद्वाच्यमिति। तदसत्॥ अवच्छेदकत्वानवगाहित्वमनुमितिविशेषणे व तत्र व्यभिचारवारणस्यान्यत्रोपदर्शितत्वात्। अव १
च्छेदकत्वावगाहित्वमनुमितौ पर्वतत्वादिना चावच्छेदकत्वप्रकारतया न भासते तादृशानुमितेरपि पर्वतो वह्निमानित्या

कारकतयातत्रावच्छेदकत्वप्रकार[illegible]तायाअनुभवविरुद्धत्वात्। नापि यत्तत्तावच्छेदकांशेऽवच्छेदकतासंबंधेन साध्यप्र
कारः। पर्वतो वह्निमानित्याद्यनुमितौ पर्वतत्वाद्यंशे निष्प्रकारकत्वस्यैवानुभवात्। पर्वतत्वादौ वह्नेः प्रकारत्वेता
दृशानुमितौ वह्निमद्धानवह्निमानित्याद्याकारतापत्तेः। किंतु पक्षतांशेऽस्वावच्छेदकपर्वतत्ववत्वसंयोगाद्युभयसंबंधे
नसा[illegible]ध्यंप्रकारः। तावतैव पक्षतावच्छेदके साध्यावच्छेदकत्वभाननिर्वाहात्। अथ वा साध्यसंसर्गे पक्षतावच्छे
दच्छेदकावच्छिन्नत्वसंबंधघटकतयाभासते। इदमेव पक्षतावच्छेदकेऽवच्छेदकत्वभानं। एवंच पर्वतत्वावच्छि
न्नत्वविशिष्टसंयोगादिः पर्वतो वह्निमानित्याद्यनुमितौ वह्न्यादेः पर्वतांशे संबंधइति पर्यवसितं॥ केचित्तु॥ अ
वच्छेदकावच्छेदेनानुमितावच्छिन्नत्वसंबंधेन पक्षतावच्छेदकं विधेयांशे प्रकारतया भासते। नचैतत्पासति पर्वतः
पर्वतत्वीयवह्निमानित्याद्याकारक[illegible]तापत्तिरितिवाच्यं॥ यत्र स्वातंत्र्येण पर्वतत्वादेर्वह्न्यादेर्विशेषणत्वं तत्रैवतादृशा
कारकं ज्ञानं। अत्र तु पर्वतादिविशेषणतापन्नस्यैव पर्वतत्वादेर्वह्न्यादौ विशेषणत्वमुपेयतेऽतो नानुमितेस्तदाकारता।

गव

२ अत एव च पर्वतविशेषणतापन्नधूमादेः कालीनत्वसंबंधेन वह्न्यादिविशेषणत्वेपि लिंगोपधानमते नानुमितेर्धू
मीयवह्निमानित्याकारकता। अथ पर्वतादिविशेषणतापन्नपर्वत[redacted]त्वादेः यत्र वह्न्यादिविशेषण
तातत्रैव चेत् तन्नास्य न पर्वतत्वीयवह्निमानित्याकारकता तद्रूपपर्वतत्वावच्छिन्नपक्षकपर्वतत्वीयवह्नित्वावच्छिन्नसा
ध्यकानुमितेरप्यतथाकारतापत्तेः तत्रापि वह्न्यादिविशेषणपर्वतत्वादेः पर्वतादिविशेषणतापन्नत्वादिति चेत् न
भिप्रायमवगतवानसि न वयं वक्ष्यमाणत्या पर्वतादिविशेषणीभूतस्य पर्वतत्वादेर्यत्र वह्न्यादौ विशेषणत्वं तत्रानुमितेर्न
तथाकारतेति ब्रूमः अपि तु इतरविशेष्यतानिरूपितविशेषणतातोऽन्यैव यत्र वह्न्यादिविशेष्यतानिरूपितपर्वतत्वा
दिविशेषणता तत्रैव ज्ञाने तादृशाकारकता तादृशरूपवच्च विशेषणताख्यातं यणा विधेयतेत्युच्यते अस्ति चेयं पर्वतत्वीयव
ह्नित्वावच्छिन्नसाध्यकस्थलेऽतो न तादृशानुमितेस्तथाकारतानुपपत्तिः। यत्र चेतरविशेष्यतानिरूपिते च विशेषणता एतन०
वह्न्यादिविशेष्यतानिरूपिता तत्र च वह्निमानित्याकारः प्रकृते च तादृशरूपे च विशेषणतेति नानुपपत्तिः। अथ पर्वतादिविशे २
तपर्वतत्वादिविशेषण।

ष्यतानिरूपितपर्वतत्वादिविशेषणतासमवायादिसंसर्गावच्छिन्नासैवचेद्वह्न्यादिविशेष्यतानिरूपितातदातादृशा
ज्ञानस्यवह्न्यादिविशेष्यतानिरूपितसमवायादिसंसर्गावच्छिन्नपर्वतत्वादिप्रकारताशालित्वाद्धूमादौसमवायादि
नापर्वतत्वादिमदन्यत्वनिर्णयदशायामवच्छेदकावच्छेदेनानुमित्यनुपपत्तिरितिचेतनावह्न्यादिविशेष्यतानिरूपित
विशेषणतायाःसमवायादिसंसर्गावच्छिन्नत्वेपिसमवायादिसंसर्गावच्छिन्नप्रकारतात्वरूपेणतस्यानवह्न्यादिविशेष्यता
निरूपकत्वंकिंत्ववच्छिन्नत्वसंसर्गावच्छिन्नप्रकारतात्वरूपेणैवोपदर्शितबाधबुध्यादिप्रतिबध्यतावच्छेदकेत्वयाद
शप्रकारतायाःसमवायादिसंबन्धावच्छिन्नप्रकारतात्वेनवह्न्यादिविशेष्यतानिरूपकत्वंसैवनिवेशनीयेतिनक
श्चिद्दोषः।वस्तुतस्तु।उपदर्शितबाधबुद्धेःवह्न्यादिविशेष्यतानिरूपितसमवायादिसंसर्गावच्छिन्नपर्वतत्वादि
प्रकारताशालित्वंनप्रतिबध्यतावच्छेदकंकिंतुवह्न्यादिविशेष्यतानिरूपितायाःसमवायादिसांसर्गिकविषयतातन्नि
रूपितपर्वतत्वादिप्रकारताशालित्वंप्रकृतेसमवायादिसांसर्गिकविषयतापर्वतादिविशेष्यतानिरूपितैवनतुवह्न्या

गंग
२
3

द्विविशेष्यतानिरूपिततथासमवच्छिन्नत्वीयसांसर्गिकविषयतायाः निरू[illegible]ष्यनिरूपकभावोपगमात् तथा च प्रकारता
याः ऐक्येपि नोपदर्शितानुपपत्तिरिति। अथ पक्षसाध्यसंबंधकोटौ पक्षतावच्छेदकावच्छिन्नत्वभानकल्पनापेक्षया एतन्मते ना
घवानवकाशात् किमेतावता प्रयासेन। किं चैतन्मते। अवच्छेदकावच्छेदेनानुमितौ अधिकस्य साध्यांशेऽवच्छिन्नत्वसंबं
धेन पक्षतावच्छेदकवदन्यत्वादिप्रकारकनिर्णयाभावस्यापि हेतुत्वात् तादृशानुमितिसामग्र्याभिन्नविषयकप्रत्यक्षादौ
वोत्पत्त्या व्यभिचारप्रसंगात्। न च तत्प्रत्य[illegible]दिप्रतिबंधकतायां तादृशबाधाद्यभावनिवेशनगौरवं तदनिवेशे तादृश[illegible]वा
धदशायां भवन्मतेऽनुमित्यनुदयेन प्रत्यक्षादेरेवोत्पत्त्या व्यभिचारप्रसंगात्। न च तादृशबाधकालेऽवच्छेदकावच्छेदेनानु
मितेरनुत्पादेपि सामानाधिकरण्येनानुमितौ बाधकाभावात् प्रत्यक्षादिकमस्मन्मतेपि न तत्र प्रतिबंधकं तदानीमेव
सामानाधिकरण्येन सिद्धिसत्वे तादृशानुमितेरनुत्पादसंभवात्। न च पक्षतावच्छेदकावच्छिन्नत्वविशिष्टसंयोगादिना एम०
साध्यस्य पक्षांशे विशेषणत्वमतेपि पक्षे तादृशविशिष्टसंबंधावच्छिन्नप्रतियोगिक[illegible]ताकसाध्याभावज्ञानविरोधा ३

भावादेरधिकस्यानुमितिसामग्रीघटकतया अनुमितिसामग्रीप्रतिबंधकतायां तन्निवेशासम्भमिति वाच्यं । मन्मते तादृश-
साध्याभाववत्तानिर्णयाभावस्यैव मन्मतेपि पर्वतत्वावच्छेदेन पर्वतत्वीयमत्वविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रकार-
कनिर्णयाभावादेरधिकस्य तादृशानुमितिसामग्रीघटकतया सामान्येन साध्यांशे पक्षतावच्छेदकबाधाभावनिवेशनस्य मन्म-
तेऽधिकतयाभावस्य दुर्वारत्वादिति मैवं । एतन्मते वह्निर्न पर्वतत्वीयपर्युत्येतादृशाऽलौकिकप्रत्यक्षं प्रति तादृशानुमिति-
सामग्र्याः प्रतिबंधकत्वं न कल्प्यत इति लाघवं । तादृशानुमित्युत्पत्तिकाले वह्न्यंशेऽवच्छिन्नत्वसंबंधेन पर्वतत्वप्रकारकबा-
धनिर्णयस्यावश्यसत्वात् बाधनिर्णयाभावस्य च कार्यसहवृत्तितया हेतुत्वेन तदभावादेव तदानीं तादृशप्रत्यक्षादिवार-
णसंभवात् । बाधाभावस्य पूर्ववर्तितामात्रेण हेतुत्वेपि पर्वतत्ववदन्यवह्निमत्पर्वतवान् देश इत्यादिविशिष्टवैशिष्ट्याव-
गाहिप्रत्यक्षादिकं प्रत्यपि एतन्मते तादृशानुमितिसामग्र्याः प्रतिबंधकत्वेन कल्प्यते । अवच्छेदकावच्छेदेनानुमितिसामग्री-
काले वह्नौ पर्वतत्ववदन्यत्वप्रकारकबाधनिर्णयाभावादेरवश्यंसत्वात् तादृशबाधनिर्णयाघात्मकविशेषणताव-

श्रव

४ च्छेदकादिप्रकारकनिर्णयस्वरूपकारणाविरहादेव तादृशप्रत्यक्षादिवारणसंभवात् न चैवमस्मन्मतेपि अवच्छिन्नत्वविशिष्टसं
५ योगस्य संबन्धावच्छिन्नप्रतियोगिताकवह्न्यभाववत्पर्वतादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादिकं प्रति तादृशानुमिति
सामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवं संभवतीति वाच्यं मन्मतेपि तत्समशीलस्य पर्वतत्वीयवह्न्यभाववैशिष्ट्याव विशिष्टवैतादृ·२
गाहिप्रत्यक्षे तादृशानुमितिसामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवस्य सत्त्वादित्याहुः । अत्रेदं चिन्त्यते पर्वत
त्वाद्यवच्छिन्नत्वविशिष्टसंयोगादिघटितव्यापकत्वावगाहिपरामर्शजन्यानुमितिं प्रति तादृशविशिष्टसंयोगादिसं
सर्गकत्वेन कस्यापि विप्रतिपत्तिः । व्यापकताघटकसंबन्धेन व्यापकज्ञानस्य सर्वसंमतत्वात् । किंतु शुद्धसंयोगादि
घटितव्यापकत्वावगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्तापरामर्शादनुमितिरुत्पद्यते तत्रावच्छिन्नत्वसंबन्धेन प
क्षतावच्छेदकं साध्यांशे विशेषणं कृत्वा साध्यसंसर्गे पक्षतावच्छेदकावच्छिन्नत्वसंबन्धघटकतया भासते इत्येव विचार्य ए०
तत्र च पक्षावच्छेदकावच्छिन्नत्वं साध्यसंसर्गांशे भासते इत्येव समाप्तिरिति प्रतिभाति । पर्वतत्वाद्यवच्छिन्नसंयोगादिसंस ४

गावच्छिन्नवह्न्यादिप्रकारतायाः तत्संसर्गघटितव्यापकताज्ञानजन्यानुमितौ क्लृप्तत्वात् तस्या एव प्रकृतानुमितौ स्वी
कर्तुमुचितत्वात्। पर्वतादिपारतंत्र्येण साध्यांशे ऽवच्छिन्नत्वसंसर्गावच्छिन्नपर्वतादिप्रकारताया एव क्लृप्तत्वात् त
अन्यत्राक्लृप्तत्वात्। तादृशसंबंधेन पर्वतत्वादिविशिष्टवह्न्यादिसाध्यकानुमितौ च वह्न्यंशे स्वातंत्र्येण त
त्प्रकारताया एव क्लृप्तत्वात् कार्यकारणभावलाघवानुरोधेनातिरिक्तविषयताकल्पनस्य चान्याय्यत्वादिति
अवच्छिन्नत्वं चाधिकरणस्वरूपसंबंधविशेषो व्यापकत्वं चात्र स्वरूपसंबंधरूपमवच्छिन्नत्वं निरूपितं च विशिष्टः
पर्वतो वह्निमानित्यादौ प्रागभावकालीनोत्पत्तिसंयोगध्वंसानित्यादौ निरूपितं च ध्वंसप्रागभावकालादिरूपपर्याप्ततावच्छेद
कनिरूपितत्वं वह्निसंयोगध्वंसादिरूपसाध्यसंबंधेनास्ते व्यापकत्वरूपमवच्छिन्नत्वं च पर्वतो वह्निमान् पृथिवीरूपव
तीत्यादौ। व्यापकत्वं च पर्याप्ततावच्छेदकसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्निसंयोगत्वावच्
छिन्नत्वरूपं न तु तादृशप्रतियोगितानवच्छे[illegible]दकधर्मावच्छिन्नत्वरूपं अन्यथा द्रव्यत्वावच्छेदेन वह्न्याद्य

ग्रव

५ नुमितेरपिप्रमात्वप्रसंगात्तवह्न्यादिसंयोग[illegible]पितादृशप्रतियोगितानवच्छेदकगुणत्वावृत्त्यवच्छिन्नत्वात् । न
5 चैवमपि द्रव्यत्वाद्यवच्छेदेन समवायसंबं[illegible]न रूपाद्यनुमितेरपिप्रमात्वप्रसंगः । समवायस्यैकत्वमते रूपसमवा
यत्वादेरपि द्रव्यनिष्ठात्यंताभावप्रतियोगितानवच्छेदकत्वात् इति वाच्यं । रूपसमवायस्य वाय्वादौ सत्वेपि रू
पात्मकविशेषणविरहेण रूपविशिष्टसमवायत्वावच्छिन्नप्रतियोगिताकाभावसत्वात् । उपदर्शितानु
मित्याश्च तादृशधर्मे तथाविधाभावप्रतियोगितानवच्छेदकत्वावगाहनेन तस्या भ्रमत्वोपपत्तेः । अथवा यत्तता
वच्छेदकसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्ननिरूपितत्वमेव साध्यसंब
धांशे संबंधघटकतया भासते एवं चोक्तानुमित्यादौ रूपत्वाद्यात्मकसाध्यतावच्छेदकांशे द्रव्यादिनिष्ठाभावप्रति व
योगितानवच्छेदकत्वावगाहनात्तस्या भ्रमत्वोपपत्तिः । अथ तादृशानुमितिरपि विशिष्टसमवायत्वांशे रूपत्वो राम॰
पेतात्तादृशप्रतियोगितानवच्छेदकत्वमप्रमरूपा किं वा तादृशप्रतियोगितानवच्छेदकरूपविशिष्टसमवाय ५

न त्वाद्यवच्छिन्नसमवायेनादृशप्रतियोगितानवच्छेदकरूपत्वावच्छिन्ननिरूपितसमवायेनवायत्वांशे रूपप्रमनुपा
तत्रनाद्यः पक्षः। पतस्तदभाववतितत्प्रकारकत्वमेवतद्भ्रमत्वं तच्चानुमितौ च प्रतियोगितानवच्छेदकत्वस्यसंसर्गको
टिनिविष्टतयाप्रकारत्वाभावेनतत्स्यानुपसमवायत्वाद्यंशे प्रतियोगितानवच्छेदकत्वभ्रमरूपतोपपद्यते। नांत्यः।
तादृशविशिष्टसंबंधस्याप्रसिद्धेः यत्तु तादृशविशिष्टसंबंधाप्रसिद्ध्यावयितादृशप्रतियोगितानवच्छेदकत्वरूप
समवायत्वसमवायैतत्त्रितयसंबंधेन पक्षांशे साध्यभ्रमरूपत्वमुपेयते। समवायेन पक्षे साध्यसत्वे यितादृशत्रितय
संबंधेन तस्याभावसत्वादितितन्न। तथा सति पृथिवीत्वाद्यवच्छेदेन रूपानुमितेरपिभ्रमत्वप्रसंगात्। पृथिवीत्व
वन्निष्ठाभावप्रतियोगितानवच्छेदकत्वादेः पृथिव्यंशे रूपसंबंधत्वेमानाभावेनतद्धटितत्रितयसंबंधावच्छ
छिन्नप्रतियोगिताकरूपाभावस्यपृथिव्यंशेसत्वात्। तच्चैवं। किंचुग्रीवादिमात्रास्तीत्यादौ का गतिः। तादृशज्ञानेकं
वुग्रीवादिमत्तावच्छिन्नत्वस्यप्रतियोगितांशेसंबंधविधयैवभानात् तत्तदप्रकारतयाप्रतियोगितांशेतद्भ्रमरूपता। संभ

अव॰

६

6

वातकंबुग्रीवादि[...]मत्त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धेस्तेन संबंधेनाभावांशे कंबुग्रीवादिमत्त्वभ्रमस्वरू-
पत्वासंभवात् इति वाच्यं । अभाववुद्धौ स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रतियोगिविशेषणतापन्नप्रति-
योगितावच्छेदकस्याभावांशे प्रकारत्वोपगमात् तादृशाबुद्धेः स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे कंबु-
ग्रीवादिमत्तावच्छेदकस्याभावांशे प्रकारत्वोपगमात् तादृशाबुद्धेः स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे
कंबुग्रीवादिमत्त्वभ्रमस्वरूपत्वादिति । मैवं । संबंधकोटिनिविष्टविशेषणविशेष्यतायामपि प्रकारतात्वमुपग-
म्यते तादृशप्रकारताकत्वमेव भ्रमत्वघटकम् । एवं च द्रव्यं न रूपवदित्याकारिकावच्छेदकावच्छेदेनानुमितिः स्वप्रसमवा-
यत्वांशे रूपत्वांशे वा तादृशप्रतियोगितानवच्छेदकत्वभ्रमरूपैव तादृशप्रतियोगितानवच्छेदकत्वोपसंसर्गि-
कविषयतायामपि प्रकारतात्वसत्त्वेन तादृशानुमितेस्तत्प्रकारकत्वस्यावश्यकत्वात् तादृशसंसर्गिकविषय- एम॰
तायां प्रकारतात्वसत्त्वे मानाभावः इति वाच्यं । तादृशज्ञानस्य भ्रमत्वानुपपत्तेरविमानत्वात् [redacted] ६

कविषयतायांप्रकारतात्वस्यैवभानाभावइतिवाच्यंतादृशज्ञानस्यभ्रमत्वानुपपत्तेरवत्ता [redacted] अवच्छिन्नत्वसं
बंधेनप्रकारतावच्छेदकस्यज्ञानेविशेषणतासंभवात्भ्रमत्वोपपादनेऽतिप्रसक्तविषयताकल्पनेप्रसंगात्
।एवंसांसर्गिकविषयताविशेषेविशेष्यतात्वमपिस्वीकार्यमितिनचसंसर्गकोटिनिविष्टविशेषणादिवि
षयतायांप्रकारतात्वादिस्वीकारेतादृशविशेषणस्यतदीयविशेष्यतावगाहिबुद्धिदशायांविशिष्टसंसर्गज्ञानानु
दयप्रसंगइतिवाच्यंतत्रविशिष्टसंसर्गकज्ञानानुपगमेऽपिक्षतिविरहात्।वस्तुतस्तु।संसर्गकोटिनिविष्टविशेष
णतामेकत्रद्वयमितिरीत्यैवभानस्वरूपेपते·वाय्वादिप्रतियोगितावच्छेदकंचएकविशेषणविशिष्टविशेषणतां
तरप्रकारकत्वमेवेतिनानुपपत्तिः।अथसंसर्गकोटिनिविष्टविशेषणविषयतायांप्रकारतात्वस्वीकारेतज्ज्ञा
नंविनातद्विशिष्टज्ञानानुदयप्रसंगःतत्प्रकारकबुद्धौतज्ज्ञानस्यहेतुत्वादितिचेत्नज्ञायतएवतज्ज्ञानंविनात
द्विशिष्टसंसर्गकज्ञानं।अथवासांसर्गिकविषयतान्यप्रकारताशालिबुद्धित्वमेवविशेषणज्ञानजन्यतावच्छेद

म॰ त्र
१ कमतोनानुपपत्तिः। अवच्छेदकावच्छेदेनानुमितौ चावच्छिन्नसंयोगादिघटितव्यापकत्वावगाही परामर्शो हेतुः का
7 रिवानुमित्युत्पत्तौ तयोः परस्परं व्यभिचारप्रसंगः र्णः शुद्धसंयोगाद्यघटितव्यापकत्वावगाही अवच्छेदकावच्छेदेन हे
तुमत्तावगाही परामर्शश्च हेतुः न चोभयपरामर्शादेकविधानुमित्युत्पत्तौ तयोः परस्परं व्यभिचारप्रसंग इति वाच्य
म्त्रत्यलिंगकानुमितौ व्यभिचारवारणाय कार्यतावच्छेदककोटौ कारणाव्यवहितोत्तरत्वनिवेशस्यावश्यकतया त
त एव व्यभिचारवारणसंभवात्। ८ पाठ्याप्यास्तु। शुद्धसंयोगाद्यघटितव्यापकत्वावगाहिनोऽवच्छेदकावच्छेदेन हेतु
मत्ताज्ञानादपि समानाधिकरण्यमात्रावगाहिनीमनुमितिं स्वीकुर्वंति तेषामयमाशयः। अनुमितौ साध्यांशे
व्यापकतानवच्छेदकरूपं संबंधांशे च व्यापकतानवच्छेदकरूपं न भासते लाघवज्ञानं तन्यानुमितावपि महान
सीयत्वादेवं द्रव्यांशे भानानुपगमात्। एवं च पर्वतत्वव्यापकत्वविशिष्टसंयोगादिसंसर्गेण व्यापकताग्रहमत ल॰
लितादृशविशिष्टसंयोगादिसंसर्गकानुमितिः कथमुत्पत्स्यते। अथ व्यापकतानवच्छेदकादिकं साध्यांशे न। १

भासते इत्यत्र तद्भासकसामग्र्यभाव एव बीजं। प्रकृते पर्वतत्वावच्छिन्नसंयोगादिसंसर्गेण व्याप्यत्वाज्ञानं विनापि शु ग
द्धसंयोगघटितव्यापकता त्वावगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्तापरामर्शात् पर्वतत्वावच्छिन्नसंयो
गादिसंसर्गकानुमितेरनुभविकतया तादृशपरामर्शघटितसामग्र्या साध्ये संबंधांशेऽवच्छिन्नत्वभानप्रयोजक
त्वाभ्युपगमात् तद्भासकसामग्री च नेत्येवेति न तद्भानानुपपत्तिरिति चेत्। न। उपदर्शितपरामर्शजन्यानुमितौ प
क्षतावच्छेदकावच्छिन्नत्वभासकत्वासंभवात्। अत्र मिश्रानुयायिनः। तादृशानुमितौ बाधाभावादेरेव पक्षताव
च्छिन्नत्वभासकः। पर्वतत्वावच्छिन्नसंयोगादिसंसर्गकवह्निप्रकारकानुमितेः सामानाधिकरण्याद्यवगाहि बाधाभा
वादिजन्यतावच्छेदकत्वात्। न च तादृशानुमितेरप्याप्रसिद्ध्या तादृशानुमितित्वावच्छिन्नं प्रति बाधा
३ भावादिहेतुत्वमप्रसिद्धमिति वाच्यं। तादृशविशिष्टसंसर्गघटितव्यापकताज्ञानजन्यानुमितेः पक्षतावच्छेदकावच्छि
न्नत्वावगाहितया तदनुरोधेनैव तादृशहेतुतायाः कल्पत्वात्। अत्र पक्षे तादृशबाधाभावो यद्यपि तथापि व्यापकत्वावगाहि

श्री

८

परामर्शसहकारित्वैव फलं तन्न युतीत्यवश्यमभ्युपेयं। अन्यथा शुद्धसंयोगघटितव्यापकत्वावगाहिनः सामानाधि
करण्येन हेतुमत्तात्पत्तानवच्छेदकावच्छेदेनानुमितेरापत्तिः। न चेष्टापत्तिः। गृहीतमात्रासिद्धेः। पृथिवीत्वादिना
द्रव्यत्वावच्छेदेन रूपाद्यनुमानप्रसंगात्। न चैतत्कश्चिदभ्युपैति। एवं नावच्छिन्नसंयोगादिघटितव्यापकत्वा
वगाहिपरामर्शरूपसहकारिविरहात्कथमुपदर्शितस्थलेऽवच्छेदकावच्छेदेनानुमितिरुपपद्यतामेवं। अवा
च्छिन्नसंयोगघटितव्यापकत्वावगाहिपरामर्शसहकारिणो वावच्छेदकावच्छेदेन हेतुमत्तावगाहि शुद्धसंयोगघटि
तव्यापकत्वविषयकपरामर्शसहकारेणापि बाधाभावादौ सति तथाविधानुमितिकत्वौत्पादकत्वमभ्युपेयते। न च ता
दृशपरामर्शस्यावच्छेदकावच्छेदेनानुमितिहेतुतायां क्लृप्तत्वाद्बाधाभावादीनां तादृशानुमितिजनने कथं सहका
रितेति वाच्यं। तथाविधपरामर्शोत्तरं सामानाधिकरण्येनानुमितेरुपाध्यायैर्मतं पि स्वीकारात्। तत्र तद्धेतुत्वे कल्पनीये सं रामा०
सर्गांशे पर्यवसितमनिवेश्यावच्छिन्न[illegible]संयोगसंसर्गकानुमितिसाधारणसंयोगसंसर्गकानुमितित्वस्यैव जन्यतावच्छे ८

३ दकत्वोपगमेनानुपपत्यभावात्। अथ सामानाधिकरण्येनानुमितौ अवच्छिन्नसंयोगसंसर्गकहेतुमत्ताज्ञानस्य पृथक्
कारणत्वं नास्ति सामानाधिकरण्येन हेतुमत्ताज्ञाने हेतुतायाः संसर्गांशे पर्याप्तिनिवेशप्रयोजनविरहेण तदनिवेशेऽपि
संयोगादिसंसर्गकधूमादिमत्तानिरूपितत्वेनैव हेतुताकल्पनात् तादृशकारणतयैवोपपत्तेः। एवं च बाधाभावादि
नाप्यवच्छेदकावच्छेदेनाप्यनुमितिजननेऽवच्छिन्नसंयोगादिसंसर्गकहेतुमत्तावगाहिपरामर्शत्वावच्छिन्नस्य सहका
रितानैव संभवति। तद्रूपस्य जनकतानवच्छेदकत्वात्। संयोगादिसंसर्गकपरामर्शत्वावच्छिन्नत्वस्य सहकारित्वे
च पूर्वोक्तातिप्रसंगस्तदवस्थः। न च सामानाधिकरण्यमात्रावगाहिहेतुमत्तापरामर्शे हेतुतायां संयोगाद्यंशे
पर्याप्तिरवश्यं निवेशनीया। अन्यथा संयोगादिसंसर्ग घटितव्यापकत्वावगाहिनः संयुक्तसंयोगादिसंसर्ग
कपरामर्शादनुमित्यापत्तिरिति। अवच्छेदकावच्छेदेन हेतुमत्तानुमितिवगाहिनो परामर्शस्य पृथक्कारणत्वम
वश्यं वाच्यं। पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितसंयोगादिनिष्ठसांसर्गिकविषयतानिरूपितहेतुप्रका

अव

८ ऽवच्छिन्नधूमप्रकारतातावच्छेदेन तादृशनिश्चयत्वानिरूपितलाघव[illegible]ता हि न ग्राह्याभाववत्त्वग्रहस्य प्रतिबन्धकताभावनिवेशानुरोधेन संयोगादिसंस

1 ताशालिपरामर्शत्वेनैवानुमितिहेतुत्वोपगमात् । संयुक्तसंयोगादित्वत्वाणां परासंबन्धसंसर्गस्थले च यत्त्ववि

षयतानिरूपितायाः संयोगविषयतायाः हेतुप्रकारतानिरूपितसंयोगविषयताभिन्नतया तादृशपरामर्शाद

नुमित्यापत्तिसंभवेन न पर्याप्तिनिवेशप्रयोजनाभावादिति चेन्न । पक्षतावच्छेदकसामानाधिकरण्यमात्रेण

धूमाभाववत्तदवच्छेदेन धूमसमवगाहमानात् संशयादनुमित्यापत्तिवारणाय परामर्शहेतुतायां संसर्गांशे पर्याप्ति

निवेशनमावश्यकमेव । पक्षतावच्छेदकसामानाधिकरण्यमात्रेणोभयकोटिकज्ञानादनुमित्यनुपपत्तयेऽवच्छि

न्नविशेष्यतात्तासंसर्गावच्छिन्नधूमाभावप्रकारताशून्यत्वरूपस्यैव निश्चयत्वस्य निवेशनीयतया तत्रोपदर्शि

तसंसर्गवारणासंभवात् । एवं चावच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य पृथक्कारणत्वमुपाध्यायैरप्यनुमतम् । एवं शु

द्धसंयोगादिसंसर्गावच्छिन्नधूमप्रकारतात्वावच्छेदेन धूमाभाववद्विशेष्यतानिरूपितत्वावगाहिनो ज्ञानावच्छिन्नसंग्र°

योगादिसंसर्गकपरामर्शावच्छिन्नसंयोगादिसंसर्गकपरामर्शयोः पृथक्कारणत्वमावश्यकं । एककारणताम

ते एकत्रैवोभयविधाप्रामाण्यग्रहाभावयोः निवेशनीयतया एकविधपरामर्शकाले ऽन्यविधपरामर्शीयाप्रामा
ण्यज्ञानमात्रसत्वे ऽप्यनुमित्यनुत्पादप्रसंगात्. न च स्वीयधूमाभाव[illegible]वद्विशेष्यतानिरूपितत्वप्रकारतानिरूपि
तविशेष्यतावत्वसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य हेतुप्रकारतायामेव निवेशनीयतया एकवि
धप्रकारतायां तादृशविशेष्यतानिरूपितत्वाद्यवगाहिभ्रमत्वग्रहदशायां नान्यविधहेतुप्रकारताशालिपराम
र्शादनुमित्यनुदयापत्तिरिति वाच्यं धूमप्रकारतात्वेन यत्किंचित्धूमीयप्रकारतामात्रविशेष्यकस्य तादृशरूपा
वच्छिन्नधूमप्रकारताविशेष्यकस्य वा धूमाभाववद्विशेष्यतानिरूपितत्वग्रहस्य सत्वे धूमांतरप्रकारताशालि
व ज्ञानादनुमित्यापत्तेः। न च तादृशविशेष्यतावच्छेदकत्वसंबंधावच्छिन्नप्रतियोगिताकाभावस्य निवेशान्नापत्तिप
रिति वाच्यं शुद्धसंयोगसंसर्गावच्छिन्नप्रकारतात्वादेः विशेष्यतावच्छेदकत्वे प्रकारतात्वस्यापि तदनतिरिक्तत
यातथात्वात्। स्वावच्छिन्नसंयोगादिसंसर्गाद्यप्रकारतायामपि तादृशधर्मावच्छिन्नविशेष्यताकग्रहस्य ऽपदर्शि

अ२

१० त संबंधेन सत्वात्। तादृशाप्रामाण्यग्रहसत्वदशायां अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानादितो ऽनुमित्यनुदयस्य
दुर्वारत्वात्। अवच्छेदकताया व्यासज्यवृत्तित्वस्यास्याग्रहविषयत्वात्। तादृशावच्छेदकतापर्याप्त्याश्रयं वं पक्षधर्मत्वनि
विशेषितद्वैमत्तादवस्थ्यात्। न च प्रथमोपदर्शितस्याप्रामाण्यग्रहस्य स्वीयतादृशविशेष्यतावच्छेदकीभूतगुरु
संयोगावच्छिन्नत्वविशिष्टधूमप्रकारतात्वसंबंधेनाद्वितीयस्य च स्वीयतादृशविशेष्यतावच्छेदकीभूतावच्छिन्न
संयोगाद्यवच्छिन्नत्वविशिष्टधूमप्रकारतात्वसंबंधेनाभावो धूमप्रकारतायां निवेश्यत इति न क्वाप्यनुपपत्ति
रिति वाच्यं। एवमप्यभावद्वयस्य एकत्र निवेशे न विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात्। प्रकार
तायाः रूपदर्शितसंबंधेनाप्रामाण्यग्रहस्याभावनिवेशेन पुरुषांतरीयाप्रामाण्यग्रहदशायामप्यनुमित्यनु
दयप्रसंगाच्चेति न किंचिदेतत्। एतादेतत्। अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य पृथक्कारणतायाः कॢप्तत्वे एम॰
पितत्वसहकृतसामानाधिकरण्यमात्रावगाहिबाधाभावस्यावच्छिन्नसंयोगादिसंसर्गकानुमितिकत्वादप्रयोजक १०

त्वकल्पनमनर्थकं। तादृशपरामर्शदशायां सामानाधिकरण्यमात्रावगाहिबाधबुद्धिसत्त्वे स्वबाध्यसामान्यस्यास
त्वेपि सामानाधिकरण्यमात्रावगाह्यनुमितेः स्वीकारे त्वतिविरहात्। न चोपदर्शितस्थले सामानाधिकरण्यमा
त्रावगाह्यनुमितिस्वीकारे तादृशस्थले सामानाधिकरण्यावगाहिसिद्धिसत्त्वेऽननुगतसिषाधयिषासत्त्वेता
दृशानुमित्युपपत्यर्थं तथाविधसिद्धिप्रतिबंधकतायां तादृशेच्छाविच्छिन्नामुत्तेजकत्वमुपगंतव्यमिति गौरवं
।अस्माकं तु तत्रावच्छेदकावच्छेदेनानुमितेरेवोत्पत्त्या तत्र तादृशसिद्धेरविरोधितया तन्नदिच्छाव्यक्तीनामुत्ते
जकत्वानभ्युपगमादिति वाच्यं। तादृशानुमितेरवच्छेदकत्वावगाहित्वोपगमेपि यत्र तादृशानुमित्यनंतरं
अननुगतप्रत्यक्षेच्छातः पक्षतावच्छेदकसामानाधिकरण्येन साध्याभावप्रकारकं अल्लौकिकप्रत्यक्षं तत्र
न्नतादृशप्रत्यक्षोपपत्तये बाधप्रतिबंधकतायां तादृशेच्छाव्यक्तीनामुत्तेजकत्वकल्पनीयतया गौरवात्।अस्मा

अव
११
10

कं तु तादृशानुमितेः सामानाधिकरण्यमात्रावगाहित्वेन सामानाधिकरण्यमात्रावगाहि साध्याभाववत्त्वाज्ञा
नाविरोधितया तादृशेच्छानामुत्तेजकत्वानभ्युपगमात् । यत्तु अवच्छेदकावच्छेदेन हेतुमत्तापरामर्शाद् वा
च्छेदकावच्छेदेनानुमितिस्वीकारे तादृशपरामर्शघटितसामग्रीप्रतिबंधकतायां सामानाधिकरण्यमात्राव
गाहिन्याः सिद्धेरभावो न निवेश्यते तादृशसिद्धिसत्वेपि तादृशपरामर्शादनुमितेरेवोत्पत्या प्रत्यक्षा
दीनामनुत्पादात् । भवतां सोऽवश्यं निवेशनीयः । भवत्वमनेन तदाऽनुमित्युदयेन प्रत्यक्षाद्युत्पादस्यावश्य ३
श्यकत्वात् । न च तत्रावच्छेदकावच्छेदेन सिद्धेरभावो भवतामपि निवेशनीयः । एवं च तत्रावच्छिन्नत्ववि
षयतामनिवेश्य संयोगादिसंसर्गकसाध्यानिरूपितत्वेन सिद्धिरनुगमय्यैकाभावो निवेश्यत इति राम०
नाधिक्यमिति वाच्यं । अन्यान्यविषयनिश्चयत्वाप्रामाण्यज्ञानाभावानां बोधकूपयकनिवेशानुरोधितावच्छेद ११

कत्वावगाहिसिद्धिसामानाधिकरण्यमात्रावगाहिसिद्धिसत्वेसत्यंद्धोः पक्षनिवेशावश्यकत्वादिति। तन्ना
वच्छेदकावच्छेदेन हेतुमत्ताज्ञानदशायां सामानाधिकरण्यमात्रावगाहिसिद्धिसत्वेसत्यां च बाधबुद्धेरनु
मितिर्नोत्पत्तुमर्हतीति सामानाधिकरण्येनानुमितौ तथाविधसिद्धेर्विरोधित्वात्। अवच्छेदकावच्छेदेनानु
मितौ च तादृशबाधबुद्धेर्विरोधित्वात्। एवं च तत्र प्रत्यक्षाद्युत्पादेपि अमतेर्यावेश्यक इति तदुपपन्नमेता
दृशपरामर्शघटितसामग्रीप्रतिबंधकतायां सामानाधिकरण्यमात्रावगाहिसिद्ध्यभावनिवेशनमावश्य
कमेव। अथैवमपि पर्वतत्वावच्छेदेन वह्न्यभावाभाववत्वावच्छिन्नप्रकारताकशाब्दबोधं प्रति पर्वतत्वाव
वच्छेदेन वह्नित्वावच्छिन्नप्रकारकमानसंप्रति च पर्वतत्वावच्छेदेन वह्निव्याप्यवत्तापरामर्शघटितसामग्री
प्रतिबंधकतायां सामानाधिकरण्यमात्रावगाहिसिद्ध्यभावो न निवेश्यत एतादृशपरामर्शकाले तथाविधसि
१२ द्धिसत्वे कदापि तादृशशाब्दबोधानुदयात् सामानाधिकरण्येन बाधासत्वोनुमितेरेवोत्पादात् तत्सत्वे तादृश

प्राकृबोधादेरपि बाधस्वरूपप्रतिबंधकसत्वेनानुत्पादादिति चेत् । सत्यं एतादृशाकृतिपदस्थलीयानुमितिसाम
ग्रीप्रतिबंधकतायां तत्र तथाविधसिध्यभावानिवेशात्प्रयुक्तलाघवं संभवत्येव परंतु घटपटाद्यनंतविध
यभेदेन प्रत्यक्षत्वप्राकृबोधादौ अवच्छेदकावच्छेदेन हेतुमत्तापरामर्शघटितवह्न्याद्यनुमितिसामग्र्याः सामाना
धिकरण्यमात्रावगाहिसिद्ध्यभावमनिवेश्य तथाविधबाधाभावं च निवेश्याधिकप्रतिबंधकताया भवता कल्पनी
यतया महागौरवप्रसंगोऽप्राक्यशरणः तथाविधप्रतिबंधकतायाश्चाकल्पने तादृशसिद्धिसत्वे बाधसामान्य
सत्वे प्रत्यक्षत्वाद्युत्पादप्रसंगात् तमनुमितेरनुत्पत्त्या प्रत्यक्षत्वादिकमिष्टमेवेति न तत्कल्पनं । यद्विशुद्धसंयोगा
दिघटितव्यापकत्वावगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्ताज्ञानात् यत्रावच्छिन्नसंयोगसंसर्गकानुमितिरु
त्पद्यते तत्र शुद्धसंयोगादिपर्याप्तिसंसर्गकविधेयतापि स्वीक्रियते तथा च सामानाधिकरण्यमात्रावगाहिसि ण्म०
द्धिकालेपि द्रव्यायमतद्रूप एवैतन्मते नानुमितिरुत्पद्यते तादृशानुमितेरपि तथाविधसिद्धिप्रतिबध्यतावच्छे १२

दकाक्रांतत्वादित्युक्तस्थले प्रत्यक्षादिकमुभयमते वेद्यमिति न तथाविधसामग्र्याः प्रतिबंधकत्वाधिक्यमिति मन्य
सितदोषदर्शितशाब्दबोधादिकं प्रति अवच्छेदकावच्छेदन हेतुमत्ताज्ञानघटितसामग्रीप्रतिबंधकतायां सामा
नाधिकरण्यमात्रावगाहि सिद्ध्यभावादिविशेषप्रयुक्तलाघवेनापि प्रसिद्धांता । एतत्कल्पेऽवच्छेदकावच्छेदेन हे
तुमत्ताज्ञानदशायामपि तथाविधसिद्धिसत्वे तादृशशाब्दबोधाद्युत्पादस्यावश्यकतया तथाविधसिद्ध्यभावस्य
तत्रावश्यं निवेशनीयत्वात् । न च लाघवविरहेऽपि गौरवविरहात् तादृशपरामर्शोत्पन्नानुमितेरवच्छेदकत्वा
वगाहित्वेनाधिकाभाव इति वाच्यं साधकविरहे स्येव बाधकत्वात् । लाघवज्ञानादिवशात् व्यापकतानवच्
छेदकरूपस्य साध्यांशे भानोपगमे एतन्मते गौरवस्यापि संभवाच्च । तथा हि यत्र पर्वतो वह्निव्याप्यवा
नित्याकारकशुद्धविशेषणताघटितव्यापकत्वावगाही अवच्छिन्नसंयोगेन हेतुमत्तापरामर्शः एवमभा
वव्याप्यवानित्याकारकशुद्धविशेषणताघटितव्यापकत्वावगाही अवच्छेदकावच्छेदे न हेतुप्रकारकः व

ग्र

१२ न्हेर्महानसीयत्वेऽभावस्य च महानसीयवह्निप्रतियोगिकत्वेनाद्ववमिति लाघवज्ञानं तत्र पर्वतो महानसी
13 यवह्निमान्नवेत्याकारकसंशयवारणायोपदर्शितलाघवज्ञानवह्निव्याप्यवत्तापरामर्शघटितायाम
ते हीनसीयवह्न्यनुमितिसामग्र्याः तदभावानुमितिप्रतिबंधकत्वमेतन्मतेऽधिकं कल्पनीयं। मन्मते महा
नसीयवह्नितदभावयोस्तत्रानुमित्यनुपगमेपि अनुमितेः संशयत्वाभावात्। अवच्छेदकावच्छेदेने
करतौकोद्यवगाहिनो विरुद्धप्रकारकज्ञानस्यैव संशयतया तन्मते च तत्रावच्छेदकत्वभानासंभवेन सामा म
नाधिकरण्यमात्रे रौवोभयकोट्यनुमितेरुत्पद्यमानत्वात्।। अथ यत्रावच्छिन्नसंयोगघटितव्यापकत्वाव
गाहीवह्निव्याप्यवत्तापरामर्श उपदर्शिताभावव्याप्यवत्तापरामर्शः उपदर्शितलाघवज्ञानं च तत्रावच्छेद
कावच्छेदेन महानसीयवह्नित्वावच्छिन्नप्रकारकसंशयानुमितेर्वारणायावच्छेदकावच्छेदेन महानसीय राम०
वह्न्यनुमितौ तादृशाभावव्याप्यवत्तापरामर्शघटितमहाभावानुमितिसामग्र्याः प्रतिबंधकत्वमुपाध्या १२

नसीयवह्नि

[redacted]र स्याभावानुमितौ उपदर्शितलाघवज्ञानतादृशवह्निव्याप्यवत्तात्वामर्शघटितमहानसीयवह्न्यनुमितिसामग्र्याः प्रतिबंधकतावच्छेदकस्य न पुंम
[redacted] यमते व्यावश्यकं। एवमवच्छिन्नविशेषणतानाघटितव्यापकत्वावगाह्यभाववद्व्याप्यवत्ताज्ञानदशायां शुद्धसं
योगघटितव्यापकत्वावगाहि वह्निव्याप्यवत्ताज्ञानस्योक्तलाघवज्ञानस्य च सत्वेऽवच्छेदकावच्छेदेन महा
नसीयवह्न्यभावप्रकारिकायाः संशयानुमितेर्वारणायावच्छेदकावच्छेदेन महानसीयवह्निस्तदभावा
न मासि नुमिमीयेतथा चोपदर्शितप्रतिबध्यप्रतिबंधकभावकल्पनं विनेनोपपत्तिर्मिश्रमते पीतिचेत्राय
त्रावच्छिन्नसंयोगघटितव्यापकत्वावगाहिपरामर्शघटितमहानसीयवह्न्यनुमितिसामग्री अवच्छिन्नवि
शेषणताघटितव्यापकत्वावगाहिपरामर्शघटिततदभावानुमितिसामग्री च तत्रोपदर्शितप्रतिबध्यप्रतिबं
धकभावेन संशयानुमितिवारणासंभवात् अवच्छिन्नसंयोगादिघटितव्यापकत्वावगाहिपरामर्शघटिते
ककोट्यनुमितिसामग्र्या अपरकोट्यनुमितिप्रतिबंधकत्वमावश्यकं। एवं च तत एवावच्छिन्नसंयोगघटित
व्यापकत्वावगाह्येककोटिकव्याप्यवत्ताज्ञानशुद्धसंयोगादिघटितव्यापकत्वावगाहिकोट्यन्तरव्याप्यवत्ताज्ञा

पुंमतेत्र शक्तिपदार्थे तेलसाहरणात्र २

न्या° १६
15

न्नदृशायां उपदर्शितसंशयानुमितिकारणसंभवेनावच्छेदकावच्छेदेनानुमितौ धूमसंयोगादिघटितव्यापक
त्वाज्ञानघटितविरोधिकोट्यनुमितिसामग्री प्रतिबंधकत्वकल्पनस्यावश्यकत्वात्। तथाचायं निष्कर्षः। उप
न्यायमते महानसीयवह्न्यभावप्रकारकानुमितित्वावच्छिन्नं प्रतिश्रावच्छिन्नसंयोगाद्यघटितव्यापकताज्ञानता
घवज्ञावघटितमहानसीयवह्न्यनुमितिसामग्रीत्वेन प्रतिबंधकत्वमेकं महानसीयवह्निप्रकारकानुमि
तित्वावच्छिन्नं प्रतिचावच्छिन्नविशेषणताघटितव्यापकताज्ञानोपदर्शितलाघवज्ञानघटितमहानसी
यवह्न्यभावप्रकारकानुमितिसामग्रीत्वेन चापरं। अवच्छेदकावच्छेदेनभावकोटिप्रकारिकायासामा
नाधिकरण्यमात्रेणाचाभावकोटिप्रकारिकायाः संशयानुमितेः प्रथमप्रतिबंधकतया निरासः वि
पा परीतायाश्चतस्याद्वितीयप्रतिबंधकतया निरासः। अवच्छेदकावच्छेदेनोभयकोटिकश्चतस्याताभ्याम् एम°
मेव। तथाचतत्राघवज्ञानाधीनायाः पर्वतोमहानसीयवह्निमान्नवेति संशयानुमितेर्वारकंद्वयमेव १६

प्रतिबंधकत्वं तेनैव सर्वत्र संशयानुमितिवारणासंभवात् मिश्रमते तु प्रदर्शितस्थले तद्वारकप्रतिबंधकत्व
[redacted]
त[redacted]स्याधिकं च एतादृशप्रतिबंधकताद्वयेन तद्वारणासंभवात् । अथ द्वितीयप्रतिबध्यप्र
तिबंधकभावं परित्यज्यावच्छेदकावच्छेदेन महानसीयवह्न्यभावप्रकारकानुमितौ प्रतिशुद्धसंयोगाद्यघटित
व्यापकताज्ञानलाघवज्ञानघटितमहानसीयवह्न्यनुमितिसामग्र्याः प्रतिबंधकत्वमेव कल्प्यमिति न समुचितं ।
एतदपेक्षयाऽवच्छिन्नविशेषणताघटितव्यापकताज्ञानघटिताया अवच्छेदकावच्छेदेनानुमितिसामग्र्याः
पक्षतावच्छेदकसामानाधिकरण्यमात्रविषयकतदवच्छिन्नत्वविषयकभेदेन द्विविधायास्तदभावव्या-
[redacted]प्यवत्ताज्ञानाद्यभावाद्यधिकघटितत्वेन गुरुत्वात् तन्मात्रवारणाया अवच्छेदकावच्छेदेन

ग्र
१५
15

भावप्रकारिकायाः सामानाधिकरण्यमात्रेणाभावप्रकारिकाया अनुमितेरनेनापि वारणासंभवात् स
र्वं च तादृशप्रतिबन्धकतायैवोपदर्शितस्थले संशयानुमितिर्वारयितुं शक्यतेऽतः प्रतिबन्धकसत्त्वेन त
त्रावच्छेदकावच्छेदेन महानसीयवह्न्यभाववत्ताभासंभवादिति चेत् न तत्रावच्छेदकावच्छेदेन महा
नसीयवह्न्यभाववत्ताभासंभवेऽपि सामानाधिकरण्येन तत्प्रकारिकाया अवच्छेदकावच्छेदेन महान
सीयवह्निप्रकारिकायाः संशयानुमितेर्वारणासंभवात्॥ तद्धारकप्रतिबन्धकत्वकल्पनाधिक्यं तु वी
रमेवानन्तोपाध्यायमतेऽनुपदर्शितप्रतिबन्धकताद्वयं कल्प्यतेऽतावच्छेदकावच्छेदेन महानसीयव
ह्न्यनुमितौऽशुद्धविशेषणताघटितव्यापकत्वावगाहि पक्षधर्मतालाघवज्ञानघटितमहानसीयवह्न्य
भावानुमितिसामग्र्या महानसीयवह्निप्रकारकानुमितिसामान्ये नत्रावच्छिन्नविशेषणताघटित एम०
व्यापकत्वावगाहि पक्षधर्मतालाघवज्ञानघटितमहानसीयवह्न्यभावानुमितिसामग्र्याः प्रतिबन्धकता १५

भावानुमितिसामग्रीरूपप्रतिबंधकतासत्त्वेनावच्छेदकावच्छेदेन पक्षहानसीयत्वहेतुरपि भावासंभवादितिवाच्यं गगमहानसीयत्वसि ४
वाकत्वपर्यन्तं तत्र विनिगमकाभावात् एतादृशप्रतिबंधकताद्वयेनापि सर्वत्र संशयानुमितिवारणासंभ
वात् एवं चोपदर्शितविनिगमनाविरहेण प्रतिबंधकताचतुष्टयेनैवावश्यकमिति विनापि प्रतिबंध
कत्वातामुक्तस्थले संशयानुमितिवारणं संभवति शुद्धविशेषणताघटितव्यापकताघटितमहा शान
नसीयत्वव्यत्वानुमितिसामग्र्यपेक्षयाप्यभावांशेव ह्रिमानप्रतिबंधकबाधाभावादिनूपाधिकघटि
तत्वेन तदभावानुमितिसामग्र्या गुरुशरीरतया विनिगमनाविरहान् वक्तव्यादिति। यत्र वच्छेदकावच्छेदेन
हेतुमत्तावगाहिनः शुद्धसंयोगघटितव्यापकत्वविषयकपरामर्शात्तत्रावच्छेदकावच्छेदेनानुमितेरनभ्यु
पगमे भागासिद्धेर्दोषत्वानुपपत्तिः। तथाहि। अवच्छेदकावच्छेदेनानुमितिर्भविष्यत्येव किमकृतं तत्र भा
गासिद्धिग्रहेण तादृशव्यापकत्वावगाहिपरामर्शस्येतरकारणसत्त्वेवताप्रयुक्तत्वं तादृशानुमिति [redacted]
[redacted] तत्स्य भागासिद्धिग्रहे [redacted] कारणीभूतपरामर्शानुत्पाददशा इति सिद्धिग्रहेऽत्र
भवच्छिन्नसंयोगादिघटितव्यापकताग्राहकसामग्रीसत्त्वे भागासिद्धिमत्त्वेऽपि तरकारणसत्त्वे तादृशपरामर्शो इत्र
त्पादात् इतरकारणसत्त्वप्रयुक्त द्वितीयपक्ष

ग्र२
१६
16

किंचित्करः अस्मन्मते चावच्छिन्नसंयोगादिघटितव्यापकताग्राहकसामग्रीविरहदशायामशुद्धसंयोगादिघ
टितग्राहकसामग्रीसत्त्वे अवच्छेदकावच्छेदेन हेतुमत्ताग्रहकेतरसकलकारणसत्त्वे मागासिद्धि ग्रहे
सति तत्र युक्त एव तादृशानुमितिजनकीभूतपरामर्शोनुत्पादः तदसत्त्वे शुद्धसंयोगादिघटितव्यापकत्वा
वगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्ताविषयकस्य तादृशानुमितिजनकीभूतपरामर्शस्योत्पत्तौ बाधकाभा
वादिति तस्यादोषत्वमुपेयते। अथास्मन्मतेपि अत्रावच्छिन्नसंयोगादिघटितव्यापकत्वावगाहिनोऽनु
कावच्छेदे मित्यात्मकस्यावच्छेदेन हेतुमत्तापरामर्शस्येतरसहकारिणामसमवधाने घटानुमितिसामग्रीभागासिद्धि
ग्रहः सामानाधिकरण्येन साध्यव्याप्यहेतुमत्तानिर्णयश्च वर्त्तते तत्र सामानाधिकरण्येन हेतुमत्तावगा
हीतादृशव्यापकविषयकप्रात्यक्षिकपरामर्शो नोत्पद्यते भिन्नविषयकानुमितिसामग्रीरूपप्रतिबंध णम०
कसत्त्वात्तन्नापि तथाविधानुमानिकपरामर्शः सामानाधिकरण्यावगाहिसिद्धिरूपप्रतिबंधकसत्त्वा १६

तत्र यदि भागासिद्धिग्रहो न स्यात्तात दादवच्छेदकावच्छेदेन हेतुमत्तावगाहि आनुमानिकस्तादृशानु
घ मितिजनकः परामर्शोत्पद्येते । अतस्तादृशस्थले यत्र तथाविधानुमितिसामग्रीविरहप्रयोजकतया भागासिद्धि
दोषतोप [redacted] पद्यत इति चेन्न हि यत्र [redacted] शुद्धसंयोगघटितव्यापकता
विषयकस्यावच्छेदकावच्छेदेन हेतुमत्तावगाहिनः आनुमानिकपरामर्शस्येतरसकलकारणसमवधानं
तानुमितिसामग्री भागासिद्धिग्रहः सामानाधिकरण्यमात्रेण तादृशहेतुमत्तानिर्णयश्च तत्र सामानाधिक
रण्यमात्रावगाह्यनुमितिसामग्री भागासिद्धिग्रहः सामानाधिकरण्यमात्रेण तादृश विरहो प्रयुक्तरीत्या भा
गासिद्धिग्रहप्रयुक्त इति इतितथाविधानुमितेर्नुद्देश्यतायामपि भागासिद्धेर्दोषताप्रसज्येतेत साध्यद्धि पय
कग्रहमात्रप्रयुक्तेः कदाचित्तादृशव्याप्तिज्ञानजन्यपक्षतासंसर्गकानुमितिस्तत्कारणीभूतपरामर्शस्य
वा सामान्याभावः तादृशव्याप्तिज्ञानजन्यतत्पक्षतासंसर्गकानुमितौ स एव दोष इत्युपगंतव्यं तथा च यथोप

अव
१९
17

दर्शितस्यत्वेऽशुद्धसंयोगादिसंसर्गकानुमितिविशेष्यजन्ये न कीदृशत्र परामर्शसामान्याभावेन भागासिद्धिग्रह
मात्रप्रयुक्तः अपि तु भिन्नविधेयकानुमितिसामग्र्यादिप्रयुक्तोपीति न तत्र भागासिद्धिर्दोषः तथावच्छेद
कावच्छेदे नानुमितावपि तुल्ययुक्त्या तस्यास्तथात्वं न स्यात्॥ अवच्छेदकावच्छेदे न हेतुमत्ताज्ञानादवच्छेद
कावच्छेदे नानुमितिस्वीकारे तु यत्र शुद्धसंयोगघटितव्याप्यत्वावगाहिनोऽवच्छेदकावच्छेदे न हेतुमत्ताज्ञा क
नस्येतरसकलकारणसमवधाने भागासिद्धिग्रहश्चावर्त्तते तत्र तन्मात्रप्रयुक्त एव शुद्धसंयोगाद्यघटितव्या
प्यकत्वावगाहिपरामर्शजन्यावच्छिन्नसंयोगादिसंसर्गकानुमितिजनकीभूतपरामर्शसामान्याभाव इति तस्य त
दोषत्वमुपपद्यत इति। तस्मात् शुद्धसंयोगादिघटितव्यापकत्वावगाहिनो हेतुमत्ताज्ञानादवच्छेदकावच्छे
देनानुमितेः स्वीकार आवश्यक इति तदसत्। अवच्छेदकावच्छेदेनानुमितौ भागासिद्धिग्रहस्य स्वतंत्रप्र राम०
तिबंधकताकल्पनेन तस्या दोषत्वमुपपद्यते। न चैतादृशप्रतिबध्यप्रतिबंधकभावकल्पने गौरवमुपाध्या १९

यमतइतिवाच्यं।तादृशप्रतिबध्यप्रतिबंधकभावकल्पनेशुद्धविशेषणताविशेषसंबंधेनधूमाभाववत्त्वव
तवान्देशइत्याद्याकारकोपनीतभानशाब्दबोधादेतथाविधानुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनेन
लाघवतर्कसत्वात्।अत्रेदंसमाधानमाकलयामः शुद्धसंयोगसंबंधेनवन्हिव्यापकत्वावगाहिअवछि
न्नसंयोगसंबंधेनहेतुमत्तावगाहिपरामर्शत्वअवछेदकावछेदेनानुमितिस्वीकारेशुद्धसंयोगसंबं
धेनवन्हिव्यापकत्वावगाहिअवछिन्नसंयोगसंबंधेनधूमवत्तावगाहिअवछिन्नसंयोगसंबंधेनवन्हि
व्यापकतावगाहिवह्निव्याप्यधूमवत्पर्वतकालीनवह्निव्याप्यधूमवान्पर्वतइत्याकारकपरामर्शत्वेनाव
छेदकावछे[redacted]देनानुमितौहेतुतावन्नकल्प्यतेइतिनलाघवंमन्यामहेतादृशपरामर्शत्वावछेदका
वछेदेनानुमितिनिर्वाहात्।भवन्मतेतत्तत्रावछेदकावछेदेनानुमित्यनुरोधेनतादृशपरामर्शस्यहेतुता

का°
१८

कल्पनमावश्यकमितिगौरवं॥ ॥अवच्छेदकानुमितिविचारः समाप्तः॥ श्री ॥ ॥ ॥ ॥ ॥

रामः
१८

16